शिरोमणिटीकायां जागदीश्यां

पक्षतादीधितिप्रकाशः

१५७५

२२ पत्रे

१३५३ पञ्चताद्याधितीप्रकाशः

॥श्रीलक्ष्मीनृसिंहो जयति॥ ॥अनुमितिलक्षणेति। अनुमितिस्वरूपैककार्येत्यर्थः। व्याप्तिज्ञानजन्याया अनुमि-
तेः किमन्यत्कारणमिति जिज्ञासायैव पक्षतानिरूपणादिति भावः। अनुकूलत्वं जनकजनकतावच्छेदकसाधारणं प्रयोज-
कत्वमात्रं तेन व्याप्तेरनुमित्यहेतुत्वेपि न क्षतिः। यत्तु जनकतावच्छेदकत्वमेवात्रानुकूलत्वं। व्याप्तिवत्पक्षताया अपि कर-
णव्यापारतया सिद्धहेतुभावस्य परामर्शस्य जनकतायामेवावच्छेदकत्वादिति तन्तुच्छं। पक्षता न कारणमिति तु असद्व्या-
ख्यातृग्रन्थसंदर्भविरोधापत्तेः। पक्षधर्मतामिति। पक्षे धर्मित्वं यस्या इति व्युत्पत्त्या पक्षतामित्यर्थः। पक्षस्य धर्मो धर्मविशे-
षः पक्षत्वमिति वा देवतादिशब्दवत्तलः स्वार्थिकत्वात्। व्याप्तीतीति। न च प्रकृतग्रन्थस्य स्वरसं बलितस्यैव पाठस्य घटु-
मुचितत्वात् व्याप्त्येतीत्येव धारणं युक्तमिति वाच्यं। अप्रयोजकत्वात्। व्याप्तिनिरूपणानन्तरमित्येवं मूलपाठमनुसृत्य वा
वा तथोपन्यासादिति भावः। ननु संदिग्धसाध्यधर्मित्वमिति मूलस्य यदि संदेहविषयीभूतसाध्यवत्त्वमर्थस्तदा वि-
नष्टे वह्न्यादौ जलादावनुमितिर्न स्यात् न च तादृशसाध्याभावेन पक्षताविरहादतः साध्यसंशयस्यैव पक्षतात्वमाह।
यत्रेत्यादिना। यद्धर्मिकयत्संबंधावच्छिन्नयत्प्रकारकनिश्चयत्वेन यत्संशयप्रतिनिवर्तकत्वं स संदेहस्तत्पक्षकतत्सं- शि॰

१

सगिकृतद्विषयकानुमितौ हेतुभूतापक्षतेत्यर्थः। तेन घटादिनिर्णयात्मकस्य पर्वतधर्मिकवह्निमत्त्वनिश्चयस्य निवर्तनीयो
क०२ ऽपि घटादिसंदेहेन पर्वतपक्षकवह्न्यनुमितौ पक्षता तत्र वह्निमत्त्वनिश्चयत्वेना प्रतिबंधकत्वादिति भावः। अत्र पक्षधर्मिकसा
ध्यवत्तानिश्चयनिवर्तनीयत्वमात्रं बाधनिश्चयेऽतिव्याप्तं। अतः संशयपदं। न च बाधनिश्चयस्य पक्षतात्वेऽपि न क्षतिः। वि
शिष्टबुद्धिसामान्यं प्रत्येव बाधनिश्चयविरोधित्वादेव तत्रानुमित्यसंभवादिति वाच्यं। संदिग्धाप्रामाण्यस्य बाधनिश्च
यस्य सत्त्वे सिद्धात्मकादपि परामर्शादनुमित्यापत्तेः। तादृशबाधनिश्चयस्य विशिष्टबुद्धप्रतिबंधकत्वात्। यद्यपि निर्वह्निः
पर्वतो रूपवान् न वा इत्यादिसंदेहात्मकस्य बाधनिश्चयस्य पर्वतधर्मिकवह्निमत्त्वनिश्चयनिवर्त्यत्वं संशयत्वेन तत्रास्तीति व
ह्निसाध्यकपक्षतालक्षणस्य तत्रातिव्याप्तिः। पक्षे साध्यसंशयत्वोक्तौ च नानुगमवार्तापि। तथापि संशयत्वमत्र ता
दृशनिश्चयाप्रतिबंधकत्वं। तथा च पक्षधर्मिकसाध्यवत्तानिश्चयनिवर्त्यत्वे सति तादृशनिश्चयप्रतिबंधकतावच्छेदकवि
षयिताशून्यज्ञानत्वं फलितार्थः। तेन गृहीताप्रामाण्यकस्य बाधनिश्चयस्य पक्षधर्मिकसाध्यवत्तानिश्चयानिवर्तकत्वाभा
वेऽपि तन्निवर्तकतावच्छेदकविषयितावत्त्वादेव सुदासः। यद्यप्येवमपि वह्निव्याप्यसाध्यकानुमितौ वह्निमान्न वेति

पर्वते १

शि० जा० प०

२ संशयः पक्षता स्यात्तस्यापि पक्षधर्मिकवह्निव्याप्यवत्त्वरूपसाध्यनिश्चयनिवर्त्यत्वात्। न चेष्टापत्तिः पर्वतो वह्निमान्न वेति संशयो
त्तरं पर्वतो वह्निव्याप्यवानित्येवं साध्यनिर्णयेऽपि वह्निव्याप्यसाध्यकानुमित्यापत्तेः तथापि प्रकृतपक्षविषयिताबहिर्भूतप्रकृत
साध्यविषयिताघटितधर्मावच्छिन्नं यत्प्रकृतपक्षधर्मिकप्रकृतसाध्यवत्तानिश्चयनिवर्त्यत्वं तन्निवेशितमित्यदोषः। पर्वतो
वह्निमान्न वेति संशयस्य वह्निव्याप्यवत्तानिश्चयनिवर्त्यत्वेऽपि तादृशनिवर्त्यतायाः पर्वतधर्मिकवह्न्यभावप्रकारकत्वेनैवावच्छे
वत्व५ दतया वह्निव्याप्यवत्त्वरूपप्रकृतसाध्यविषयितानवच्छेदकत्वात्। न च तथापि बहिर्भूतेत्यादलं व्यर्थमिति वाच्यं। वह्निव्याप्यवत्
सधर्मापर्वतो वह्निमान्न वेति संशयस्य तादृशपर्वतत्वावच्छिन्नपक्षकवह्निव्याप्यसाध्यकानुमितौ पक्षताव्युदासकत्वात्॥
भाव वस्तुतः पक्षविषयिताबहिर्भूतेत्यपहाय साध्यत्वावच्छिन्नप्रकारकत्वप्रकृतसाध्यविशेष्यकत्वान्यतरावच्छिन्नमेव सा
ध्यनिश्चयस्य निवर्त्यत्वं वाच्यं। तेन वह्नौ पक्षे वह्नेः साध्यतायां वह्निर्वह्निमान्न वेति संशयस्य पक्षविषयिताबहिर्भावेन
साध्यविषयित्वाप्रसिद्धावपि न तत्राव्याप्तिः। न चैवं ह्रदो वह्न्यभाववान् स्यादनुमाने ह्रदो वह्निमान्न वेति संशयः पक्षता न स्यात्।
तन्निष्ठायाः साध्यवत्त्वनिश्चयप्रतिबध्यतायाः वह्निमत्त्वविषयकनिश्चयत्वेनैवावच्छेदकतया साध्याभाववत्त्वविषयत्वघ शिव:
टितधर्मानवच्छेदकत्वादिति वाच्यं। इष्टत्वात् ह्रदो वह्न्यभाववान्न वेति संशयस्यैव तत्र पक्षतात्वात् साध्यपक्षभेदेन प

२

क्षतायानानात्वात्। व्याप्यवत्तासाध्यकॅलक्षणएवसाध्यविषयकत्वघटितॅप्रतिबध्यतायाः प्रवेश्यत्वादितिवदंति। [redacted] तुल्व
ह्निव्याप्येवह्निव्याप्यस्यसाध्यतायांवह्निव्याप्येवह्निमान्नवेतिसंशयस्यपक्षतात्वस्यदुर्वारतापत्तेः तादृशसंशयनिष्ठाया
स्तत्पक्षधर्मिकतादृशसाध्यवत्तानिश्चयनिवर्त्यतायाःपक्षीभूतसाध्यविशेष्यकत्वावच्छेद्यत्वादिति व्येयुं केचित्तुसंश
यत्वसमत्वप्रकृतपक्षविषयतानिरूपितसाध्यनिष्ठविषयताकत्वं। अतोवह्निव्याप्यसाध्यकानुमितौसंशयस्यानिर्व वह्नि ५
ह्नित्यसाध्यकानुमितौमहानसीयवह्निमत्वसंशयस्यनपक्षतात्वंतस्यतादृशसाध्यपक्षोभयवैशिष्ट्यावगाहित्वा
भावात्। एवंचपक्षधर्मिकसाध्यवत्तानिश्चयस्यापितादृशत्वात्तद्धारणायनिवर्त्यांतमित्याहुः। तन्नसाध्यपक्षव
त्तिनवासाध्यपक्षनिष्ठाभावप्रतियोगिनवाइत्यादिसंदेहस्यापिलक्षणगतयातत्राव्याप्तत्वात्तेषांसाध्यपक्षोभ
प [redacted] वैशिष्ट्यावगाहित्वाभावात् पर्वतोवह्निव्याप्यवान्नित्येवंसाध्यनिश्चयनिवर्तनीयस्यपर्वतोनिर्वह्निव्याप्य वह्नि २
त्तपर्वतवान्नवेतिसमूहालंबनस्यवह्निव्याप्यसाध्यकानुमितौपक्षतात्वप्रसंगाच्च। तस्यापिवह्निव्याप्या

शि०जा०प०

इदंतु चिंत्यं अन्यथास्तु यथा तथा न धा पि वह्निव्याप्यवतिवह्नेः साध्यतास्थलेतद्धर्मिकतादृशसाध्यवत्तानिश्चयप्रतिबध्यसंशयस्याप्र-
सिद्ध्याकुत्रलक्षणं नेयं वह्निव्याप्यवान्वह्निमान्नवेत्यादिसंशयस्याहार्यत्वेनाप्रतिबध्यत्वादिति ५

३

क० [illegible]त्मसाध्यपक्षोभयवैशिष्ट्यावगाहित्वात् आरोपतासंबं[illegible]च्छिन्नासाध्यविषयितायाः प्रवेशे तु पक्षः साध्यवान्नवेत्यादि
सं०२ संशयस्याप्यनुपपत्तेरितिदिक्॥ यत्तु साध्यवत्तानिश्चयनिवर्त्यसंशयत्वमित्यत्र संशयत्वं साध्याभावनिश्चयनि
श्चयनिवर्त्यसाधारणरूपं सर्वत्रज्ञानासं। अतो नोक्तदोषाणामवकाश इति तत्तुच्छं। पर्वतत्वावच्छेदेन वह्नेः साध्यतास्थले
वह्न्यभाववत्पर्वतस्वधर्मीवह्निमत्पर्वतो द्रव्यवान्नवेति संशयस्य पक्षतात्वापत्तेः तादृशसंशयस्य पर्वतत्वावच्छे
निश्चय ५ देनवह्निनिश्चयस्येव तदवच्छेदेन वह्न्यभाववैस्यापि प्रतिबध्यत्वादिति। ननु पक्षधर्मिकसाध्यसंशयत्वं साध्य
धर्मिकपक्षवृत्तितासंशयत्वादिकं वालघुलक्षणं कुतः परित्यक्तमत आह। तेनेति। यादृशसंबंधावगाहि इत्यस्य
फलमाह। न वेति। मूलस्थसाध्यधर्मत्वमित्यस्य परित्यागे बीजमाह। न वा तत इत्यादि। संदिग्धसाध्यधर्मत्वमि
ति मूलस्य संदिग्धं साध्ये धर्मित्वं पक्षस्येति युक्तत्वापत्तिः लसाध्ये संदिग्धमितियावत्॥ किंवा संदिग्धः साध्य[धर्मो]
धर्मो २ यस्येति त्रेति यथाश्रुतोऽर्थः। तत्र प्रथमे पक्षो मूततमःसम्बेतत्वस्य द्वितीये च पक्षधर्मीत्येक गगनसाध्यस्याप्र
सिद्ध्यादयमपि दु[ष्क]रमित्याशयो न तमसः पक्षतागगनस्य च साध्यतायोऽसंभवः। अत्र च मते पक्षे साध्यस शिवः

३

शायोत्तरस्मिन्नुभिकपरामर्शोत्पादेपिऽनुमितिर्भवत्येवइतिध्येयं।नयोक्तलक्षणस्यसाध्यसंशयमात्रपरत्वेऽग्निम
न्मले नतस्यविशेषणत्वापिकल्पासंगतिः।तत्रविशेषणोयो लक्षणपदयोः साक्षात् [redacted] परं परम्पराकारणपर
त्वात्संदिग्धसाध्यंयत्रतद्भिन्नत्वंतत्र [redacted] तवेधित्वमितिव्युत्पत्त्याल्लक्षं स्यविशेष्यकसाध्यसंश
यसंवेधित्वरूपपक्षताकार्थमात्रयैव विशेषणतोपलक्षणत्वयोरन्येविकल्पइतिवदंति।तदैककल्पापक्षतावे
कल्पं।ननुयोग्यतायाश्चानिरूपणादितिग्रंथेतान्नेऽनुमित्सायारेव संशययोग्यतायानिरसितुमुचित
त्वात्तेत दनिरसनात् मूलस्यन्यूनत्वमतआहसंशयेति।सिद्धिबाधयोर्जनकस्यव्याप्तितान मनोयोगादेःसर्व
त्रैवानुमितेःपूर्वसत्त्वात्व्यापेक्षे।साधकेत्यादि।तथाच साधके नबाधके न पजनितं यज्ज्ञानंइतिमूलार्थः
।ननुपक्षधर्मिकसाध्याभाववत्तिश्चयात्मनोबाधस्यकेवलान्वयिन्यप्रसिद्धिरत आह।केवलान्वयितिचे
ति।पर्वतोनवाच्यत्ववानइत्याकारकःघटादेरभावेप्रतियोगितासंबंधेनवाच्यत्वाघवगाहेपि बाधः
5१ संशयः प्रसिद्धातत्रसंभवतीत्यावेदयितुंसुलभइत्युक्तं।नचैवंनानाविधानांबाधबुद्धीनामनु

शि॰ जा॰ प॰

सामात् तत्वचनयोर्विरोधस्य पाठांतरं ४

५ गमासंभवः प्रातिस्विकरूपेणतासांति वेशेनोप्यभावद् यमितिप्रमासंगतिर्बाधाभावकूटस्यानेकत्वादितिवाच्यं
।पक्षधर्मिकसाध्यवत्ताता न विरोधिनिर्णयत्वेन तासामननुगमादितिभावः। फले प्रत्यक्षपरिकलितमिति। प्र
त्यक्षपरिकलितत्वमात्रविषयकोयोऽनुमानजन्यो बोधस्तदिच्छावतइत्यर्थः। तेनोपजातप्रत्यक्षविषयत्व
९४ दशायामेवानुमेयत्वेनाभावाचन विरोधस्येनासंगतिरिति ध्येयं। तु नरिति। उत्पन्नपरामर्शोत्तरमित्यर्थः तत्रापि॰ अनुमित्सा नाशश्छन्नेपि।।
तु नरनुमित्सार्थमनुमितीष्टसाधनताज्ञानस्यपूर्वमपेक्षणेतेनैव प्राक्तनपरामर्शनाशात् कुतः त
त्रानुमितिः स्यादत आह। ततः परामर्शोत्तरमिति। अत्र ततोऽनुमितिरित्यत्रान्वयः। इष्टसाधनताज्ञा
नपरामर्शयोः पृथक्कल्पने गौरवादाह। स्मरणात्म[illegible]काहेति। विशिष्टानुभवं प्रत्येव विशेषणज्ञा
नस्य सामाद्धेतुतयाताद्दशविशिष्टपरामर्शोर्थं विशेषणज्ञानस्यावि कल्पने गौरवमपि नास्तीत्यावेदयि धारा
तुं स्मरणात्मकादित्युक्तं। नचोक्तपरामर्शोत्तरमनुमित्सादशायां केऽनुमितिप्रसंगः सामग्रीसत्
त्वादितिवाच्यं। सिषाधयिषाविरहपायाः पक्षताया अभावात्वादिच्छासामग्र्येव प्रतिबन्धकत्वसम्भवाच्च शिवः

श्राग

ति भावः कल्पनीयमिति। न चैतावतापि प्रत्यक्षादिभिन्नं वह्निज्ञानं जायतां वह्न्यनुमितिर्जायतामित्यादिरूपाणामनुमि
त्साव्यक्तीनामननुगतरूपविरहात्तत्कारणत्वासंभव इति वाच्यं। यद्यदनुमितित्वसत्त्वएव तत्पक्षकतत्साध्यकानुमिति
त्वदनुमितित्वाविरहकूटत्वावच्छिन्नाभावत्वेनैव तत्तत्पक्षसाध्यकानुमितावनुमित्साया हेतुत्वसंभवात्। यत्तु तत्तत्पक्ष
साध्यकानुमितिनिर्वर्त्यानुमित्सात्वेनैव तत्तत्पक्षसाध्यकानुमितौ हेतुत्वं वाच्यमिति। तन्न। तादृशानुमितित्वावच्छि
न्नप्रतिबंधकतानिरूपितप्रतिबध्यतास्योक्तौ च शाब्दज्ञानं जायतामित्याकारकानुमित्साया असंग्रहापत्तेः। तस्या
अशाब्दज्ञानत्वेनैव प्रतिबंधकत्वात् प्रकृतपक्षसाध्यकानुमितिनिष्ठप्रतिबंधकत्वमात्रस्योक्तौ च समूहालंबनता
दृशानुमितिप्रतिबध्यत्व[illegible]याद्यनुमित्सायामतिव्याप्यापत्तेरिति ध्येयं। चिन्त्यमतमा[illegible]निरस्यति। न २।४
चेति। वाच्यमित्यन्वयः। अनुमितिजनिकेति। तत्पुरुषीयतत्तत्पक्षसाध्यकानुमितौ तादृशानुमितिजनकत्वेवपक्ष
तेत्यर्थः। विषयतया भावत्वधीश्चयिन्तरावसनाः समानकर्तृकत्वस्यतंत्वादिति भावः। तुल्येति। तत्पापपनगर्जिताच
नुमितौ न व्यभिचार इति भावः। तस्याः अस्थिरेच्छायाः। तदानीं सिद्धिदशायां। तज्जनकत्वे। न तादृशानुमितिजनकत्वे।

5

तद्धि। तादृशानुमितिजनकत्वं हि। अनपायादिति। न च तत्पुरुषीयतादृशानुमितिप्रतितत्पुरुषीयतादृशानुमित्यव्यवहि
तप्राक्क्षणवृत्तित्वविशिष्टेच्छात्वेन हेतुत्वात्तदानीं स्वरूपयोग्यतैव नास्तीति वाच्यं। कार्याव्यवहितपूर्ववर्तित्वादिना हे
तुत्वस्याग्रे सार्वभौमीयनिरुक्तावेव निरस्यत्वादिति भावः। तदुपधानं। तादृशानुमितिविशिष्टत्वं। तदभावादिति। तथा
यासत्यामपि सिद्धावनुमितिर्न स्यात् प्रत्युतैकानुमित्यनन्तरमेवानुमित्यन्तरं स्यादिति भावः। तत्सामग्रीति। तत्पु
रुषीयतत्पक्षकतत्साध्यकानुमितिसामग्रीविशिष्टत्वमेव तादृशानुमितिजनकत्वमित्यर्थः। प्रसङ्गादिति। तथा च प
रामर्शादिके हेतुर्न स्यादवच्छेदकत्वादिति भावः। इष्टापत्तौ बाधकमाह। शेषेति। तादृशानुमितिसामग्रीविशिष्टत्वेनैव हे
तुत्वसम्भवादिच्छाभागस्य वैयर्थ्यादित्यर्थः। न चात्र सामग्रीपदेन इच्छेतरकारणस्तोम एव वक्तव्यः तथा च सिद्धिकाली
नपरामर्शस्यापि तादृशस्तोमविशिष्टत्वात्ततोऽनुमितेर्वारणाय इच्छाभागः प्रवेशनीय इति वाच्यं। सिद्धिदशाया
मिच्छा॰न्यस्यानुमितिकारणस्तोमस्य सत्त्वादन्यथा तादृशकारणस्तोमविशिष्टापाभगवदिच्छायास्तदानीम
पि सत्त्वात्तदिच्छाभागनिवेशेऽपि तत्रानुमितेर्दुर्वारतापत्तेः। घनगर्जितानुमित्यनुरोधेन तादृशेच्छायाः सामान्या

शिवः

५

एपप्रत्यासत्याहेतुत्वासंभवादिति भावः।नन्विच्छाभागेनदेयः तादृशानुमितिसामग्रीविशिष्टत्वेनैवहेतुत्वंवाच्यं।तथैवा
नुमित्सापासर्वत्रहेतुत्वसंभवादतआह।तदानीमितिसिद्धिदशायांयत्कारणाभावप्रयुक्तः सामग्रीविरहस्तत्कार
णस्येत्यर्थः।वक्तव्यत्वापातादिति।तथाचावश्यकत्वात्सैवपक्षतायुक्तेतिभावइतिपूर्वपक्षरहस्यं॥ ० ॥
ननुक्रमोत्पन्नानांसिद्धिपरामर्शानुमित्सानांयुगपदसत्वात्सहकृतांतदृत्वंव्यर्थमतआह।यत्रेति।पक्षस्मरण
मिति।तदनंतरं श्वानुमितिरित्यन्वयः।विशिष्टानुभवंप्रत्येवविशेषणज्ञानस्यहेतुत्वात्तदपेक्षगौरवंनास्तीत्याश
येनस्मरणपर्यंतानुधावनं।अनुमित्सार्थमिष्टसाधनतास्यज्ञानानंतरंकल्प्यमतोलाघवमाह।अनुमिती
त्यादि।तादृशास्मरणादिति।साध्यतव्याप्यविशिष्टपक्षस्मरणादित्यर्थः।अनुमित्सेति।तदनंतरं श्वेत्यग्रेता
न्वयः।स्मृत्यात्मकसिद्धौसहकृतांतविशेषणस्यप्रयोजनमुक्त्वाप्रत्यक्षानुभवात्मकसिद्धौतददाह।पूर्वकालो
त्पन्नेत्यादिनाज्ञानेच्छायोर्वायुगपद्वादनुमित्साजन्यक्षणेविशेषणस्मरणासंभवस्तदुत्तरक्षणेतत्स

शा
श१ स२

6 (इंद्रिय३)

रणे तु परामर्शदशायामनुमित्सा नास्ति तत्र पक्षतयैव नोपपत्तेरित्यत उक्तं। पूर्वकालोत्पन्नेति। अनुमित्सापूर्वकालोत्पन्ने
त्यर्थः। अनुमित्सायां पूर्वं पक्षादिसन्निकर्षेऽनुमित्सा। विषयपक्षादि साध्यव्याप्यवत्त्वे न पर्वतादेः प्रत्यक्षमेवस्या
त् वह्निरर्थ लौकिकप्रत्यक्षसामग्र्याः सर्वतोबलवत्त्वादनुमित्सोत्तरं। सन्निकर्षे च परामर्शदशायां नानुमित्सायाः
सत्त्वमत उक्तं अनुमित्सासमकालेति। इदमुपलक्षणं। यत्रानुमितीच्छा साधनताविषयकस्य साध्यव्याप्यविशि
ष्टपक्षप्रत्यक्षस्यानंतरमनुमित्सा तत्रापि पक्षतासत्त्वध्वंससहकृतानांतबोध्यं। पक्षतासं[illegible]पत्तय इति। न चा
नुमित्सादशायामपि व्याप्यवच्छेदे न तदभावस्यात्मनि सत्त्वात्पक्षतानां संदेशानवच्छिन्नत्वविशेषणतयैव सामा
नाधिकरण्यस्यानुमित्साविरहवैशिष्ट्यस्योक्तत्वादिति भावः। ननु सिद्धिर्गोत्ववे छामात्रस्य सिषाधयिषात्वे द्रव्य
त्वेन द्रव्यं ज्ञानं जायतामितीच्छायामपि सिद्ध्यात्मकपरामर्शाद्यनुमितिः स्यादत आह। सिषाधयिषात्वेति। तत
साध्य इति। प्रकृतसाध्यविषयतानिरूपितप्रकृतपक्षविषयताकत्वप्रकारिकेत्यर्थः। तेन वह्निविशिष्टरूदाघ
प्रसिद्धावपि रूदोवह्निमानित्याद्यनुमितौ न पक्षताहानिः। न वा पाषाणमयत्वेन पर्वते तेजस्त्वेन वह्नेरनुमि शिवः
तिर्जायतामितीच्छायामपि सिद्धिदशायां पर्वतो वह्निमानित्यनुमितिस्तादिच्छायां वह्नित्वावच्छिन्नविधेय

त्वाघनवगाहित्वादितिभावः। वह्निमत्तया पर्वतस्य प्रत्यक्षं जायतामितीच्छावारणार्थमाह। अनुमितिविषयिणीति। यत्
किंचिदित्यादिद्रव्यत्वेन द्रव्यगोचरं ज्ञानं जायतामितीच्छायामपि वह्नेः सिद्ध्यात्मकपरामर्शादनुमित्युत्पादादित्यर्थः। एते
न ज्ञानं जायतामितीच्छोत्तरं सिद्ध्युत्पादे वक्ष्यमाणस्य विषयसिद्ध्यनुप हितत्वविशेषणादेव तादृशेच्छावारणे सि
द्ध्युत्तरं यतादृशेच्छासंभवत्येव न। ज्ञानमात्रस्यैव ज्ञानत्वप्रकारकेच्छाविरोधित्वादिति प्रत्युक्तं। नन्वनुमितिवि
न५ षयकत्वे ऽनुमितिव्यक्तीनां प्रवेशे गौरवादनुमितित्वप्रकारिकेच्छैव प्रवेश्यतामत आह। अनुमितित्वेति। सि
द्ध्यात्मकपरामर्शोत्तरं पर्वते वह्निज्ञानं जायतामितीच्छैव नोपपद्यते सिद्धिविरोधित्वात् सिद्ध्यात्मकपरामर्शपूर्व
कालोत्पन्नायास्तादृशेच्छायास्तु नानुमितावुपयोगः स्वविषयसिद्ध्यनुपहितत्वाभावादतः प्रत्यक्षाद्यतिरिक्त
मित्युक्तं। अनुमित्युत्पादकेति। तथा च व्यभिचारेण लाघवमकिंचित्करमिति भावः। ननु यत्र वह्निमत्तया प
र्वतस्य प्रत्यक्षं जायतामितीच्छैव प्रत्यक्षत्वे नानुमितिमवगाहते तत्रापि सिद्धौ सत्यामनुमित्यापत्तिः। किंच
प्रकृतसाध्यविधेयतानिरूपितप्रकृतपक्षविषयताकत्वप्रकारकेच्छायैवोत्तेजकत्वे वह्निभिन्नाविधेयका

7

नुमितिजीयतांप्रत्यक्षादिभिन्नंवह्निविषयकत्वानंजायतामित्यादीच्छादशायांसिद्ध्यात्मकपरामर्शादनुमितिर्नस्या
त्। तथा यतादृशतादृशइच्छानामप्यनुत्तेजकत्वंवाच्यं। इत्यननुगमेत्यत आह। यादृशेति। सिद्धिसमानकालीना
(श्रीत्य) नामनुमितिप्राक्क्षणस्थेच्छाविशिष्टविषयाणामनुत्तेजकविधयापक्षतायांप्रवेशोव्यर्थः। कारणतावच्छेद
कगुरुत्वापादकत्वादतः सिद्धेसत्त्वामित्युक्तं। अत्रैकाकारानुमितेस्साव्यक्तीनामनुगतैकरूपेणोत्तेजकत्व
त्वाभावार्थंयादृशयादृशेत्युक्तमितिप्राचः। वस्तुतोयद्यदिच्छाव्यक्तिसत्त्वेइत्येववक्तव्यं। अन्यथायत्रसिद्ध्यात्मको
वह्निमात्रपरामर्शस्तत्रानुमितिजीयतामितीच्छायामपिवह्न्यनुमित्युत्पादादनुमितित्वप्रकारकेच्छात्वेनास्यु
त्तेजकतयायत्रसिद्ध्यात्मकोवह्निसाध्यकपरामर्शोद्रव्यत्वादिसाध्यकपरामर्शरूपस्तत्राप्यनुमितिजीय
तामित्याकारकेच्छायांवह्न्यनुमित्यापत्तेः। एवंपर्वतमात्रपक्षकसिद्ध्यात्मकपरामर्शोयत्रवह्न्यनुमितिजीय
तामितीच्छायांपर्वतेवह्न्यनुमितिस्तत्रवह्न्यनुमितित्वप्रकारकेच्छात्वेनोत्तेजकत्वेयत्रपर्वतेमहानसेचवह्निव्या
प्यत्वपरामर्शःपर्वतेसिद्ध्यात्मकस्तत्रापिवह्न्यनुमितिजीयतामित्याकारकेच्छायांपर्वतेवह्न्यनुमित्याप शिवः

तेः। यन्नयेष्टापत्तिः। अनुभवविरोधात्। प्रकारांतरेणास्त्वविषयपर्यवसानसंभवेऽनुमित्सा नामघगता
थज्ञेयरज्ञानानं जनकत्वात्। अस्माकं तु सम्हालं बनस्थलीयतत्तदिच्छाव्यक्तीनानुतेजककोटावप्रविष्ट
त्वान्न दोषः परंतु तत्पक्षतत्साध्यकतल्लिंगकानुमितित्वावच्छिन्नप्रत्येव पक्षतायाः कारणत्वकल्पे च तल्लिं
गकतत्पक्षकतत्साध्यकानुमितित्वप्रकारकेच्छात्वावच्छिन्नाभावोऽनुगमरूपेणैव पक्षतायां प्रवेशनी
यत्वाघवात्। ननु ताद्दशतत्तदिच्छाव्यक्तीनामभावसमुदायस्य साशयेनैव यावद्दशयावद्दश इत्युक्तमिति चेद्यावदिच्छा
भावसमुदायस्येति। इत्थं तु पक्षता। सिद्धिधर्मिकयावत्प्रामाण्यज्ञानसत्वे सिद्धिदशायामनुमितिस्तत्तदप्रमाण्य
ज्ञानाभावसमुदायस्याप्रसिद्धौ विशेषणं बोध्यं। अत एव सिद्धेरनुमितिग्रंथे अप्रामाण्यज्ञानास्कंदि
तायाः सिद्धेरसत्कल्पत्वमुक्तं। न क्षतिरिति। यद्यप्येवमपि तत्तदिच्छाविरहव्यक्तीनां विशेष्यविशेषणभावे वि
निगमकाभावादनंतकार्यकारणभावः। न चैकेच्छाविरहविशिष्टोऽपरेच्छाविरहस्तद्विशिष्टसिद्धित्वे
न प्रतिबंधकत्वे सामानाधिकरण्यात्मकवैशिष्ट्यस्य द्विधाप्रवेशात् गौरवमतस्तत्तदिच्छाविरहव्यक्ती

[illegible]

8

नानेकत्वरूपमितिरीत्यायुगपदेवसिद्धिविशेषणांशतयावादिति वाच्यं। सिद्धौ तावदिच्छाविरहवैशिष्ट्ये पि सिद्ध्यंशे प्रत्येकं न
तदभावसामानाधिकरण्यवैशिष्ट्यविषयाप्रवेशात् सिद्धौ तावदभाववैशिष्ट्यस्यैव तत्तदे कैकाभावेऽपराभाव
वैशिष्ट्यस्याप्रवेशेऽपि गौरवानवकाशात्। तथापि सिद्धौ तावदभावानां युगपद्विशेषणत्वे वैशिष्ट्यरूपसामानाधि
करण्यघटितत्वांशस्य सकृदेव प्रवेशात् प्रत्येकाभावेऽ भावांतरवैशिष्ट्यस्य संबंधत्वे तु वैशिष्ट्यघटकव
ग्रं ५ तित्वस्य अ.बहुशः प्रवेशे गौरवमतो युगपदेव तावदभावव्यक्तीनां सिद्धिविशेषणत्वं युक्तं। किंच सिद्धौ तावदभाव
स्य युगपद्विशेषणत्वे विशेषणतासंबंधावच्छिन्नाधिकरणसमवेतत्वमेवानुगतः संबंधः। न च तु एकाभावे
अपराभाववैशिष्ट्यविशेषणतासंबंधावच्छिन्नस्याधिकरणे विशेषणतयावृत्तित्वं सिद्ध्यभावभावांतरवैशिष्ट्यं
तु विशेषणतासंबंधावच्छिन्नाधिकरणसमवेतत्वमित्यनुगतवैशिष्ट्यासंभवादेव नैकाभावविशिष्टापराभा
वविशिष्टसिद्धित्वेन प्रतिबंधकत्वं किंतु तावदभावविशिष्टसिद्धित्वेनैवेति दिक्। रचितं त्वास्तु न तदिच्छावि शिवः

रहकूटविशिष्टसिद्धित्वावच्छिन्नाभावस्याखंडस्य तद्व्यक्तित्वेनैव हेतुत्वं तद्व्यक्तित्वं च तादात्म्येन सैव व्यक्तिरित्यदोषः। चिंतामणिकृन्म
ते विशिष्टाभावस्यातिरिक्तत्वात्। न प्रकारतामात्रस्य धर्मावच्छेदत्वे मानाभावाद् अवच्छेदकं विनैवाखंडतादृशसिद्ध्यभावव्यक्तेरनु
मितिहेतुत्वमिति प्रलापोऽयं च। व्यापकत्वगर्भायाः कारणताया अवच्छेदकस्य नानाव्यक्तिस्थत्व इव एकव्यक्तिस्थत्वेऽपि संभवे
न धारयितुमशक्यत्वात् पदार्थांतररूपायास्तु कारणताया अवच्छेदकस्य नानाव्यक्तिकारणेष्वपि त्यागप्रसंगादित्याहुः। तच्चिंत्यं। के
चित्तु पक्षधर्मिकसाध्यविधेयकानुमितित्वप्रकारकेच्छात्वेनैवानुगतरूपेण तेजस्कत्वव्याप्यवानित्याद्यिच्छांतरस्थले तु तादृशेच्छो
त्सत्येवानुमितितत्पैव कारणीभूतस्य विशिष्टाभावस्य संपत्तेरिति प्राहुः। आलोकपरामर्शादिति। आलोकमात्रपराम
र्शादित्यर्थः। तदन्येति। धूमेनालोकेन वा वह्न्यनुमितिर्जायतामितीच्छादशायां धूमलिंगकानुमित्स्यर्थं मात्रपदं। तथा च धू
मलिंगकानुमित्साविरहविशिष्टे वालोकलिंगकानुमित्सा धूमलिंगकानुमितौ प्रतिबंधकेत्यर्थः। यद्यपि धूमलिंगकानु
मितित्वप्रकारकेच्छात्वेन उत्तेजकत्वे धूमेन द्रव्यत्वस्यालोकेन पर्व गरहेः पर्वते [illegible]नुमितिर्जायतामितीच्छायामपि वह्नि
व्याप्यधूमवत्त्वपरामर्शात् पर्वते वह्न्यनुमित्यापत्तिर्धूमलिंगकवह्न्यनुमितित्वप्रकारकेच्छात्वेन तत्त्वात्वे तु धूमेन महानसी

श्लो २

श्लो १

9 दा[illegible]वालोके न पर्वते वह्न्यनुमितिर्जायतामितीच्छायामपि धूममात्रपरामर्शात्पर्वते वह्न्यनुमित्यापत्तिः। न च पर्वतपक्षकधूमलिं
गकवह्न्यनुमितौ तादृशानुमितित्वप्रकारकेच्छाविरहविशिष्टो[illegible]कलिङ्गकेच्छात्वेनैव प्रतिबन्धकत्वं। धूमेनालोके न वानुमिति
र्जायतामितीच्छायामपि धूममात्रपरामर्शात् धूमलिङ्गकानुमित्यभावापत्तेः तदिच्छायाः पर्वतपक्षकवह्न्यनुमितित्वप्रकार
कत्वाभावात्। तथापि यद्यदिच्छाव्यक्तिदशायामालोकलिङ्गकानुमित्साव्यक्तिसत्त्वेऽपि पर्वतधर्मिकधूमलिङ्गकवह्न्यनुमि
तिप्रामाणिकी तत्तदिच्छाविरहकूटविशिष्टालोकलिङ्गकानुमितित्वप्रकारकेच्छात्वादिनैव तादृशधूमलिङ्गकानुमितिप्रति
बंधकत्वं वाच्यं। अत एवालोकलिङ्गका सतीया धूमलिङ्गिका पर्वते वह्न्यनुमितिः सा जायतामितीच्छासत्त्वेऽपि धूममात्रपराम
र्शात् वह्न्यनुमितिस्तदिच्छाव्यक्तेरुत्तेजकानन्तर्गतत्वात्। न च यत्र धूममात्रपरामर्शोत्तरं धूमालोकोभयलिङ्गकानुमिति
व्यक्तिर्जायतामितीच्छा[illegible] तत्र तदुभयलिङ्गकपरामर्शोत्पत्त्यानुमितिस्तत्र तदुभयलिङ्गकपरामर्शोत्पादक्षणेऽपि धूमलिं
गकानुमितिः स्यादग्निमानुमित्यनुरोधेन तदिच्छाव्यक्तेरुत्तेजकत्वादिति वाच्यं। तत्र त्यसमूहालंबनपरामर्शव्यक्तिविशिष्टत
दिच्छाव्यक्तित्वेनैवोत्तेजककोटौ निवेश्यत्वादित्यथ[illegible]चालोकेन महानसे वह्न्यनुमितिर्जायतामितीच्छासत्त्वेऽपि धूमपरामर्शा
त्पर्वते वह्न्यनुमितिरप्रत्यूहैव। न हि इच्छाव्यक्तेरपि[illegible]स्वस्मिन्नुत्तेजकत्वादत एवालोके न वह्न्यनुमितिर्जायतामितीच्छात शिवः

रंधूमालोकयोः समूहालंबनपरामर्शात्पर्वते वह्न्यनुमितिर्नस्यात्तस्यापि धूमपरामर्शो व्यवहितोत्तरत्वेन धूमलिंगकानु
मितित्वावरतादृशानुमितिविरोधि आलोकानुमित्सायाः सत्त्वादिति निरस्तं। न हि छाव्यक्तेरप्युत्तेजकत्वात् धूमलिंकत्वप्रकार
केच्छात्वेन उत्तेजकत्वासंभवस्यानुपदमुक्तत्वात्। यत्तु पर्वतधर्मिकवह्न्यनुमितिसामान्ये प्रत्येवालोकादिलिंगकपराम
र्शाभावविशिष्टालोकादिमात्रलिंगकानुमितीच्छात्वेन प्रतिबंधकत्वं न तु धूमादिभिन्नतल्लिंगकानुमितित्वावच्छिन्नं प्रत्येव तत्
दन्यलिंगकानुमितीच्छात्वेन प्रतिबंधकत्वं कार्यतावच्छेदकेगौरवापत्तेः। तथा चोक्तस्थले आलोकपरामर्शसत्त्वादेव तल्लिंग
कानुमित्सानानुमितिप्रतिबंधिका। न च मात्रपदवैयर्थ्यं धूमपरामर्शोत्तरं आलोकेन धूमेन वा वह्न्यनुमितिर्जायतामिती
तत्ता १५ च्छादशायामनुमित्यर्थं तदुपादानादिति [illegible] धूमपरामर्शदशायामालोकेन धूमेन वा वह्न्यनुमितिर्जायतामितीच्छासत्त्वे
पि अनुमितिप्रसंगात् आलोकपरामर्शाभावविशिष्टायाऽपि तादृशेच्छाया आलोकलिंगकत्वमात्रप्रकारकत्वात्। न चा
लोकपरामर्शाभावविशिष्टधूमलिंगकत्वाप्रकारकालोकलिंगकानुमितीच्छात्वेनैव पर्वतधर्मिकवह्न्यनुमितिसामान्यं प्र
तिविरोधित्वान्नैषदोषइति वाच्यं। तत्स्यालिंगपरामर्शोत्तरमप्यालोकेन धूमेन वा वह्न्यनुमितिर्जायतामितीच्छासत्त्वे वह्न्य
नुमितिप्रसंगात् तादृशेच्छाया धूमलिंगकत्वप्रकारकत्वेनाविरोधित्वात्तस्मात्तत्तल्लिंगकानुमितित्वावच्छिन्नं प्रतिप्रा

10 गुरुक्रमेणन तदन्यलिंगकानुमित्सात्वेन प्रतिबंधकत्वमेवसम्यगिति दिक्॥ यद्यपि तत्रेति अन्यसाध्यकानुमित्साया इव अन्यलिं
गकानुमितिच्छाया अपि स्वतः प्रतिबंधकत्वे मानाभावादिति भावः॥ तत्रेति॥ सिद्ध्यात्मकाल्लोकपरामर्शोत्तरं धूमेनानुमि तुयामि
तीच्छादशायामनुमितेर्वारणायेत्यर्थः॥ न चैतत्तदनुमित्साव्यक्तीनां उत्तेजककोटावप्रवेशादेव तत्रानुमितिरिति वाच्यं प
र्वतसिद्ध्यात्मकाल्लोकपरामर्शोत्तरं धूमलिंगकानुमित्सा ततश्च क्रमेण सिद्ध्यात्मकधूमपराम[illegible]र्शे वह्न्यनुमितितत्र धूमपरा शीत् ८
मर्शोत्पत्तिक्षणे वह्न्यनुमित्यापत्तेः पर्वतपक्षकवह्न्यनुमितीतदिच्छाव्यक्तेरप्युत्तेजकत्वादन्यथा तत्रैव सिद्ध्यात्मकधूमपरा
मर्शाद्वह्न्यनुमितिर्न स्यादिति भावः॥ यद्यपि वक्ष्यमाणस्वविषयसिध्यनुपहितत्वेनैव धूमादिलिंगकतत्तत्परामर्शेन
विशिष्टाया एव तत्तदनुमित्साव्यक्तेरुत्तेजकतायां न कोपि दोषः। प्रागुक्तस्थले धूमपरामर्शे विशिष्टानुमित्साविरह
सहकृतसिद्धिसत्वादेव धूमपरामर्शोत्पत्तिदशायां अनुमित्यापत्तेरसंभवात्॥ तथापि मिश्रादिसंमतमेकावच्छेदेन
पक्षतापरामर्शोभयजन्यत्वमनुमितेः संपादयितुमनुमितीच्छामेवान्यथानिर्व्यक्तितत्तल्लिंगकानुमितीच्छेति उत्तेजिके
तिशेषः। व्याप्ये[illegible]तिपरेणान्वयः॥ ननु तल्लिंगकानुमितित्वप्रकारकेच्छाव्यक्तीनामुत्तेजकत्वे वह्न्यनुमितिर्जायतामि
तीच्छादशायां सिध्यात्मकाल्लोकपरामर्शात्लोकलिंगकानुमितिर्न स्यात्तदिच्छाव्यक्तेरालोकलिंगकत्वाप्रकार शिवः

कत्वादत आह। तदन्यमात्रेत्यादि। धूमा॰ नो काप्यो वह्न्यनुमिति जायतामितीच्छादशायामा॰लोकपरामर्शाद्वह्न्य
नुमित्यर्थमावपदं। तथा यत्तल्लिंगकानुमितित्वाप्रकारकत्वे सति यायत्किंचिल्लिंगकानुमितित्वप्रकारकेच्छातदति
रिक्तानुमितीच्छाबाध्या इत्यर्थः। तेन प्रमेयलिंगकानुमितिस्त्वित्वेतदन्यलिंगाप्रसिद्धावपि न क्षतिः। अथ तदन्यलिंगकानु
मितीच्छातिरिक्तत्वेन विशेषणं किं तत्तेजकी॰ नूतनतत्तदिच्छाव्यक्तीनाम परिचायकमात्रमिति मंतव्यं। ननु तल्लिंगकानु
मित्साविरहविशिष्टसिद्धिसत्त्वेप्यन्यलिंगकानुमित्सा अन्यलिंगपरामर्शोत्तरं प्रकृतपक्षसाध्यकानुमितेरुत्पादेन व्यभिचा
र कुतः पक्षताया अनुमितिहेतुत्वमत आह। लिंगेति। लिंगविशेषनियंत्रितलिंगविशेषावच्छिन्नकार्यतानिरूपितकारण
ताक। तथा च यद्यदिच्छाव्यक्तिसत्त्वे सिद्धिदशायां तल्लिंगकतत्पक्षकतत्साध्यकानुमितिर्जायते तत्तदिच्छाव्यक्तिविरहवि
शिष्टसिद्ध्यभाववत्तल्लिंगकतत्पक्षसाध्यकानुमितित्वावच्छिन्नं प्रत्येव हेतुरतो न व्यभिचार इति भावः। अन्यलिंगकानुमित्सा
यास्तल्लिंगकानुमितौ स्वातंत्र्येण विरोधित्वे पक्षताया लिंगविशेषानियंत्रितत्वे॰पि न क्षतिरित्याह। तल्लिंगकानुमि
ताविति। सिद्ध्यभावदशायामन्यलिंगकानुमित्सासत्त्वेपि तल्लिंगकानुमित्युत्पत्तेराह। सिद्धिकालीनेति। सिद्धिविशिष्टेस्य

॥ त्यर्थः तल्लिङ्गकानुमित्सासत्त्वेऽन्यलिङ्गकानुमित्सायास्तल्लिङ्गकानुमितिप्रतिबन्धकत्वादाह। तल्लिङ्गकानुमित्साविशेषविरह
विशिष्टेति। तल्लिङ्गकानुमितित्वं तल्लिङ्गकपरामर्शाव्यवहितोत्तरानुमितित्वं। तथा चालोकलिङ्गकानुमित्सादशायां धूमा
लोकयोः सिद्ध्यात्मकपरामर्शोत्तरं पर्वतो वह्निमानित्यनुमितिर्न स्यात्तस्यापि निरुक्तधूमलिङ्गकत्वेनालोकलिङ्गकानु
मित्साप्रतिबध्यत्वादतो विशेष्यपदं। तेन वस्तुगत्या तल्लिङ्गकानुमितिगोचरयत्पदिच्छाव्यक्तिसत्त्वे अन्यलिङ्गकानुमित्सा
कालेऽपि तल्लिङ्गकानुमितिर्जायते तल्लिङ्गकानुमितिगोचरतत्तदिच्छाविरविरहकूटविशिष्टान्यलिङ्गकानुमित्सात्वेन तत्तल्लि
ङ्गकानुमितिप्रतिबन्धकत्वमुक्तस्थले चालोकलिङ्गकानुमितीच्छाव्यक्तेरपि वस्तुगत्या धूमलिङ्गकानुमितिगोचरतया
तदिच्छाव्यक्तेरुत्तेजककोटिनिविष्टत्वान्न दोषः। विशेषपदासत्त्वपक्षेपि तल्लिङ्गकानुमित्साविरहविशिष्टेत्यस्योक्तरूपवा
धर्म्यासः। अत्रापि वैशिष्ट्यं स्वसमानकालसमयावच्छेदेनैकात्मवृत्तित्वं। तेन कालान्तरीयपुरुषान्तरीयतल्लिङ्गकानुमित्सामादाया
न्यलिङ्गकानुमित्सादशायामनुमितेरुत्पादः। न च तल्लिङ्गकानुमित्साभिन्नतदन्यलिङ्गकानुमित्सैव प्रतिबन्धिका तत्त
ल्लिङ्गकानुमित्साविरहवैशिष्ट्यप्रवेशे गौरवादिति वाच्यम्। यत्र सिद्ध्यात्मकापेक्षाबुद्धिस्वरूपधूमपरामर्शोत्तरं क्रमे
णालोकलिङ्गकानुमितित्वप्रकारेण धूमलिङ्गकानुमितित्वप्रकारेण वा इच्छाद्वयं तत्र चतुर्थक्षणे धूमलिङ्गकानुमि शिवः

११

त्यनुत्पादापत्तेः॥ धूमलिंगकानुमित्साभिन्नायाश्च याग्नोकलिंगकानुमित्सायाः सत्त्वादिति भावः। अन्यलिंगकानुमित्सै
वेति वा काशेऽनास्थायां पूर्वकल्पोक्तस्य तल्लिंगकानुमित्साविरहविशिष्टसिद्ध्यभावत्वेन तल्लिंगकानुमितिहेतुत्वस्य लघुत्वेन
तदपेक्षया तत्कल्पस्योक्तत्वात्। तत्र पक्षसाध्यकानुमितौ सामान्यतः सिषाधयिषाविरहविरहविशिष्टसिद्ध्यभावत्वेन का
रणत्वस्याप्यवक्तव्यत्वे ऐकव्यक्तिकत्वादन्यथासिद्ध्यात्मकपरामर्शमात्रादप्यनुमित्यापत्तेरिति ध्येयम्॥ ननु साधकमानसिद्धि
जनिकामितिस्तथा च परामर्शमात्रादप्यनुमितिर्न स्यात्तस्यैव तादृशसाधकमानत्वादतो व्याचष्टे। साध्यवत्तानिश्च
य इति। साध्यवत्त्वसंशये अनुमित्युत्पादान्निश्चय इत्युक्तम्। यद्यपि साध्यनिश्चयत्वं यदि साध्यसामान्याभावाप्रकारक
त्वे सति साध्यप्रकारकत्वं तदा पर्वतः कपित्ववह्निमान्न वेति संदेहदशायां पर्वतो वह्निमानित्यनुमितिर्न स्यात्तादृश
संदेहस्यापि वह्निसामान्याभावाप्रकारकत्वे सति वह्निप्रकारकत्वात्। न च येन रूपेण साध्यता तन्माभावावच्छिन्नप्रका
रताकत्वं निश्चयत्वघटकमतः कपित्ववह्नित्वावच्छिन्नप्रकारताकसंदेहस्य वह्नित्वमात्रावच्छिन्नप्रकारताकत्वा
भावान्न दोष इति वाच्यम्। पर्वतः कपित्ववह्निमानिति निश्चयदशायामपि पर्वतो वह्निमानित्यनुमित्यापत्तेः। तादृ

शनिश्चयस्य वह्नित्वमात्रावच्छिन्नप्रकारताकत्वाभावात् न चेष्टापत्तिरनुमवविशेषात् अन्यरावृत्तग्राश्रितत्वे साध्ये सकलत
गवाश्रितत्वं न हेतुरविशिष्टसाध्यानुमितौ विशिष्टसाध्यवत्ताग्रहस्यापि विरोधितया पक्षधर्मताग्रहदशायामसिद्धसाधना
दिति शक्तिवादे मिश्रैरप्युक्तं। यदि साध्यप्रतियोगि काभावाप्रकारकत्वे सति साध्यप्रकारकत्वमेव साध्यनिश्चयत्वं।
तदा तु तावह्निश्चन्यपर्वतो वह्निमानित्येवंरीत्यापि पर्वतो वह्निमानित्य [redacted] नुमित्यापत्तिरुक्तनिश्चयस्य साध्य
प्रतियोगिकाभावप्रकारकत्वे न विरोधित्वात्। तथापि वह्नित्वावच्छिन्नविधेयकानुमितिं प्रति वह्निसामान्याभावाप्र
कारकवह्निप्रकारकत्वेन कपित्वयह्न्यभावाप्रकारकत्वकपित्वयह्नित्वाद्यवच्छिन्नप्रकारकत्वादिना च प्रत्येकधर्मेणैव प्र
तिबंधकत्वात्तादृशनिश्चयाभावकूटस्यैव पक्षतात्वं विरोधिसाध्यनिश्चयानामनुगतैकधर्माभावात्। वस्तुतः सा
ध्यतावच्छेदकावच्छिन्नप्रकारतान्यप्रकारत्वानिरूपितप्रकृतपक्षनिष्ठविशेष्यताकज्ञानत्वमेव पक्षधर्मिकसाध्य
निश्चयत्वं व्याप्यवत्तः कपित्ववह्निमान्नवेत्यादिसंशयेतु पर्वतनिष्ठविशेष्यत्वं वह्नित्वावच्छिन्नप्रकारताभिन्नेन क शिवः
पित्ववह्न्यभावत्वावच्छिन्नप्रकारत्वेन निरूपितमतस्तद्व्युदासः। संशयविशेष्यतामात्रस्यैव प्रकारताद्वयनिरूपि

तत्वादेवं धर्मिनि वह्निर्वह्निमांश्च पर्वत इत्यादि समुच्चयस्यापि साध्यनिश्चयत्वसंभवात् तत्र त्वेऽपि न वह्न्यनुमितिः समुच्चयस्थले प्रका
रताद्वयनिरूपितविशेष्यताद्वयोपगमात् न तत्त्वं घटवत् पटवच्चेत्यत्र भूतलस्य द्विधाभानवत् तत्रापि पर्वतस्य प्रकारद्वयोज्ञो
न्य २ द्वैविध्येन भानादित्यर्थः विस्तरः॥ तत्र पर्वते तस्य वह्नेः अनुमितेरिति। उत्पादादिति शेषः। धर्मितेति। न चैवं वह्निमान् वह्नि
मानित्येवमप्यनुमितिः स्यात् धर्मितावच्छेदकमनन्तर्भाव्य वह्निमत्तानिश्चयस्याविरोधित्वादिति वाच्यं। इष्टत्वात् वह्निमत्स
क्षक वह्निसाध्यकानुमितिमन्तर्भाव्य पक्षताया हेतुत्वाकल्पने तदापत्तेः संभवाच्च। अत्रापि धर्मिते त्युपलक्षणं। एक
संबन्धेन पक्षे साध्यवत्त्वनिश्चयेऽपि संबन्धान्तरेण साध्यानुमितेरुत्पादात् संबन्धविशेषोऽप्यनुप्रवेशनीयः। पर्वतत्व
स्यावच्छेदकत्वं विषयीकृत्यैकत्र पर्वते साध्यसिद्धावन्यत्र पर्वते सर्वथैवानुमित्यनुत्पत्तिः। पर्वतत्वस्य सामानाधिकरण्ये
नेत्युक्तं। अवच्छेदकत्वमविषयीकृत्य पर्वतत्वप्रकारेणेति तदर्थः। तादृशानुमितिः पर्वतत्वसामानाधिकरण्येन सा
ध्यानुमितिः धर्मिविशेषोऽपीति। तथा च पर्वतत्वप्रकारेण तत्तत्पर्वतधर्मिकवह्न्यनुमितौ तद्रूपेण तत्पर्वतधर्मिकवह्न्या
दिनिश्चयत्वेनैव प्रतिबन्धकत्वं वाच्यमिति भावः। इदमुपलक्षणं साध्यतावच्छेदकरूपेणैकव्यक्तेः सिद्धावपि विनानुमि

13

त्सायातद्रूप्येणसाध्यातरस्यानुमितेरानुभविकत्वेसाध्यविशेषोऽपिनिवेशनीयइतिद्रष्टव्यं।नान्यथेति।धर्मांतरानुमि
त्यनुत्पादेतु धर्मिविशेषोननिवेश्यइत्यर्थः।अथतत्पुरुषीयवह्न्यादिविधेयकानुमितिंप्रतितदीयानुमित्साविरहविशिष्ट
तदीयवह्न्यादिमत्तानिश्चयत्वेनसमानविशेष्यत्वप्रत्यासत्त्यैवप्रतिबंधकत्वंनतुसामानाधिकरण्यप्रत्यासत्त्यातथास
तिपर्वतत्वादिविशिष्टविशेष्यकवह्न्याद्यनुमितौपर्वतत्वादिविशिष्टविशेष्यकवह्न्यादिमत्तानिश्चयत्वेनविरोधित्वेधर्मि
तावच्छेदकविधयापर्वतत्वमहानसत्वाद्यानंतर्भावेनानंतकार्यकारणभावकल्पनापत्तेः।नचतत्वापिपुरुषभेदादनंतहे
तुहेतुमद्भावः।तत्पुरुषस्यापिकचित्पक्षतयातद्भेदेनकार्यकारणभावनानात्वस्यत्वयाप्यंगीकर्तव्यत्वात्तथाचार्थव
सत्त्वपक्षैवावश्यंधर्मिविशेषस्यनिवेशइति चेन्न।पाषाणमयत्वेनपर्वतेवह्निनिश्चयेऽपिपर्वतत्वेनवह्न्यनुमित्यु
त्पत्त्यासमानविशेष्यकत्वाप्रत्यासत्त्याप्रतिबंधकत्वासंभवात्।नचैकधर्मावच्छिन्नविशेष्यत्वमेवप्रत्यासत्तिरित्यदोषः।
पाषाणमयत्वस्याप्येकधर्मतयातदवच्छिन्नविशेष्यत्वस्याव्यावर्तनात्तत्तद्धर्मावच्छिन्नविशेष्यतात्वेनप्रत्यासत्तिता
यास्तत्तद्धर्मघटितसंबंधभेदेनकार्यकारणभावानंत्यं।अथापितत्पुरुषत्वस्यावच्छेदकधर्मविधयाप्रवेशेगौ
रवंपुनरधिकं।वस्तुतःसमानविशेष्यत्वप्रत्यासत्त्याविरोधित्वेयत्रपर्वतघत्वर पोर्वैयोरेवसाध्यवत्वनिश्चयात्म

ध्यव्याप्यवत्तापरामर्शे अनंतरं च पर्वतांशे साध्यनिश्चयस्याप्रामाण्यज्ञानं पर्वतधर्मिकानुमितिर्जायतामिती छावाग्रेत्तर
कालं पर्वतइव चत्वरेपि साध्यानुमितिः स्यात् अप्रामाण्यज्ञानाभावविशिष्टस्यानुमित्साविरहविशिष्टस्य साध्यनिश्चयस्य
विशेष्यतासंबंधेन चत्वरे विरहात् तदप्रामाण्यज्ञानव्यतिरेकेऽनुमित्साव्यतिरेकेऽनुत्तेजकत्वे पर्वतेप्यनुमित्यनापत्तेरिति
दिक्॥ पक्षतेत्यादि पक्षतावच्छेदकीभूतपर्वतत्वादिधर्मावच्छेद्यत्वम् विषयीकृत्य सिद्धावपीत्यर्थः तदवच्छेदेनेति। पक्ष
तावच्छेदकीभूतपर्वतत्वादिधर्मावच्छेद्यत्वं विषयीकृत्यानुमितेर्दर्शनादित्यर्थः। तदवच्छेदेन सिद्धेरिति। पर्वतत्वावच्छेद्यत्वा
वगाहि सिद्धेरित्यर्थः। विरोधित्वमित्यत्रान्वयः। एवं च पर्वतत्वावच्छेद्यत्वावगाहि पर्वतधर्मिकवह्निविधेयकानुमितौ पर्व
तत्वावच्छेद्यत्वावगाहि पर्वतधर्मिकवह्निनिश्चयत्वेन प्रतिबंधकत्वं। अत्र च पर्वतविशेष्यकत्वे पर्वतत्वविशिष्टविशे
ष्यकत्वमात्रं तेन पर्वतत्वावच्छेदेन वह्निनिश्चये पर्वतो वह्निमानित्याकारिकायाः इव नीलपर्वतो वह्निमानित्याकारिकायाऽ
पिऽनुमितेर्नोत्पत्तिः। पर्वतत्वावच्छेद्यत्वं तु न स्वरूपसंबंधो मानाभावात् किंतु पर्वतत्वव्यापकसाध्यकत्वमेव तदपि सं
सर्गमर्यादयैव भासते पर्वतो वह्निमानित्यनुमितौ पर्वतत्वव्यापकवह्निसंयोगत्वेनैव संयोगस्य संबंधविधया

२१

मानस्वीकारात्। न च पक्षतावच्छेदकव्यापकत्वमेव तदवच्छेद्यत्वमस्तु साध्यप्रवेशो व्यर्थ इति वाच्यं पर्वतत्वावच्छेदेन तद्रूपवत्त्वानुमितेः प्रमात्वापत्तेः समवायस्यैकत्वात् पर्वतत्वव्यापकसमवायेन पर्वतस्य तद्रूपव्यक्तिसत्त्वात्। न च पर्वतत्वव्यापकवह्निसंयोगेन वह्नेः साधनव्यापकत्वमहो तादृशसंबंधेन वह्न्यनुमित्यसंभव इति वाच्यं। एकविशेषबाधसहकारात् व्यापकतानवच्छेदकप्रकारेणाऽऽनिरुक्तसिद्ध्यभावरूपपक्षता सहकारात् व्यापकतानवच्छेदकसंबंधेनापि साध्यानुमितेः सामान्यपरामर्शादेव संभवात्। न च पर्वतधर्मिकवह्न्यनुमितिमात्रं प्रत्येव पर्वतत्वावच्छेद्यत्वावगाहिवह्निनिश्चयस्य विरोधित्वात् प्रतिबध्यत्वादि(?) पर्वतत्वावच्छेद्यत्वनिवेशो व्यर्थ इति वाच्यं। पर्वतत्वावच्छेदेन सिद्ध्युत्तरं तदवच्छेदेनानुमितेस्तथापि पर्वतत्वावच्छेदेन इदंत्वसामानाधिकरण्येनाप्यनुमित्यापत्तेः॥ यत्तु पर्वतत्वावच्छेद्यत्वमवच्छेद्यतासंबंधेन पर्वतत्वादिकं वा साध्यांशे प्रकारतयैवानुमितौ भासते तेन तथा च पर्वतः पर्वतत्वावच्छेद्यवह्निमानित्येव पर्वतत्ववैशिष्ट्यमानित्येवं वाऽनुमितिरिति प्राचीनमतं तच्चिंत्यं। शिखरावच्छिन्नपर्वतो वह्निमानित्याद्यनुमितौ नुपक्षतावच्छेदकीभूत शिखरावच्छेद्यत्वस्वरूपसंबंधरूपमेव भासते न तु व्यापकत्वलक्षणमनुम । शि॰

यात्सत्वे च शिखरावछेघवह्निसंयोगे न वह्न्यनुमितौ शिखरावछेघवह्निसंयोगे नैव वह्नेर्निश्चयविरोधीन तु संयोगमात्रेणेत्यवधेयं॥
सामानाधिकरण्यमात्रेणेति। पक्षतावछेदकरूपेण पक्षे साध्यानुमितित्वमेव तत्सामानाधिकरण्येनानुमितित्वं तत्र पक्षता
वछेदकावछेदेनाप्यस्तीति अतो मात्रपदं। सिद्धिमात्रस्येति। अत्र पक्षतावछेदकसामानाधिकरण्यमात्रेणानुमितित्वं पर्वतत्वाव
वछेदेन तत्सामानाधिकरण्येन च परामर्शी द्वयात् पर्वतत्वावछेदेनावगाहितद्वैवह्न्यनुमित्योर्युगपदुत्पादप्रसंगात्। सामग्री
सत्वात्। किंतु यद्रूपेण साध्यतावछेदकसंबंधत्वं तादृशधर्मावछिन्नसंसर्गताकपक्षधर्मिकसाध्यानुमितित्वं। निरुक्तपरामर्शी ह्रु
दस्थत्वे संयोगनिष्ठद्विविधसंसर्गताकसत्वादत्र नानुमितिरित्वीकारात् तथा च संयोगत्वमात्रावछिन्नसंसर्गताकपर्वतधर्मि
कवह्निविधेयकानुमितिं प्रति संयोगत्वविशिष्टसंसर्गताकपर्वतधर्मिकवह्निनिश्चयत्वेनैकरूपेण सिद्धिप्रतिबंधकं पर्वतत्वावछे
देन वह्न्यनुमितौ तु संयोगनिष्ठसंसर्गता न संयोगत्वमात्रावछिन्ना किंतु पर्वतत्वावछेघवह्निसंयोगत्वावछिन्ना एवं इति पर्वतत्वसा
मानाधिकरण्येन सिद्धिसत्वेऽपि च तदुत्पत्तिः। न चैवं संयोगमात्रेण वह्निनिश्चयेऽपि पर्वतीयसंयोगेन वह्न्यनुमितिः स्यात्। तस्याः पर्व
तीयत्वविशिष्टसंयोगेन वह्निं तु यद्दशायां संयोगमात्रेण पर्वते वह्न्यनुमितिरिति वाच्यं। इष्टत्वात् एवमनायेवद्धिश्च अन्यत्र प्रतिबं
धकत्वमुह्यमिति संक्षेपः॥ इत्थं चेति। पक्षतावछेदकावछेदेन सिद्ध्युत्तरं तत्सामानाधिकरण्यमात्रेणानुमितसायामपि तदवछे

पौ२ तानन्यघटितविशेषप्रकारेणेव तादृशसंबंधेनापि सिद्धेः सामान्यानुमिति ध्रि

15 देनानुमित्यनुत्पत्तेः। तादृशानुमितौ पक्षतावच्छेदकावच्छेदेनानुमित्सैवोत्तेजिका वाच्या। एवं पक्षतावच्छेदकसामानाधिकरण्यमात्रेण
सिद्ध्युत्तरं तदवच्छेदेनानुमित्सायामपि तत्सामानाधिकरण्येनानुमित्यनुत्पत्तेस्तादृशानुमितौ पक्षतावच्छेदकसामानाधिकर
ण्यमात्रेणानुमित्सैवोत्तेजिका अनुमितिविशेषेणापि निर्यन्त्रितं पक्षत्वं यद्वा तत्पक्षसाध्यकानुमितिं प्रत्येव सामान्य
तः पक्षताहेतुः। पक्षतावच्छेदकावच्छेदेनानुमितौ तु तदवच्छिन्नसिद्धिकालीनातत्सामानाधिकरण्यमात्रेणानुमित्सापृथक्
प्रतिबंधिका पक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमितावपि सामानाधिकरण्येन सिद्धिकालीनातदवच्छेदेनानुमि
त्सापृथक् विरोधिनी वाच्या। यदि चासत्यामपि समानाकारसिद्धौ पक्षतावच्छेदकावच्छेदत्वावगाह्यनुमित्सायां तत्सा
मानाधिकरण्यावगाह्यनुमितेर्नोत्पादस्तदा सिद्धिकालीनत्वं प्रतिबंधकतायां न विशेष्यमिति भावः। सध्यविशेष्यकेति।
विनाप्यनुमित्सामित्यादि। तां प्रतीति। पक्षविशेष्यकानुमितिं प्रतीत्यर्थः। समानाकारेति। तथा च संयोगसंबंधावच्छिन्ना
धेयत्वसंसर्गेण पर्वतनिष्ठप्रकारतानिरूपितवह्नित्वावच्छिन्नविधेयकानुमितिं प्रति तादृशसंबंधावच्छिन्नपर्वतनिष्ठ तार
प्रकारतानिरूपितवह्नित्वावच्छिन्नविशेष्यताकनिश्चयत्वेनैव विरोधित्वं। विधेयत्वं तु न प्रकारतया निर्यंत्रितं किंतु प
र्वते वह्निः पर्वतो वह्निमानित्यनुमितौ पर्वते वह्निमनुमिनोमि न तु वह्नौ पर्वतमित्यनुव्यवसायसाक्षिको विषयताविशेषः। शिवः

पिविशेष्यवृत्तिरप्रतीति नासिद्धिः। अत एव गुरुतानागुणत्वमित्यत्र विशेष्यीभूतस्यापि गुरुत्वस्य विधेयत्वमुक्तमुपाध्यायैरिति ध्ये
यं। ननु पक्षविशेष्यकसिद्धेरुत्तरं साध्यविशेष्यकानुमितिर्न क्वाप्यनुभवसिद्धा इत्यत आह नाहशेति। पक्षनिष्ठप्रकारतानि
रूपितसाध्यविधेयकानुमितीत्यर्थः। सिद्धिमात्रमिति। साध्यविशेष्यिकापक्षविशेष्यिका वा सिद्धिर्विरोधिनीत्यर्थः। पर्व
तो वह्निमानिति निर्णयोत्तरं वह्निः पर्वतव्याप्यवत्तापरामर्शोत्तरं वह्निः पर्वते इत्यनुमितौ तु न वह्नेर्विधेयत्वं किंतु पर्वतस्यै
व तथात्वं यथा व्याप्यवत्ताज्ञानजन्यत्वमनुमितेस्तद्दशायां विधेयताख्यविषयतास्वीकारा दिति भावः। प्रसिद्धसाध्यक
परामर्शोत्तरं सर्वत्रैव पक्षसाध्योभयविशेष्यकानुमितिः स्यात् पक्षताद्वयसत्त्वे नोभयधर्मावच्छिन्नरत्नानम्नी सत्वादित्य
स्वरसाद्भूपवाद्य साध्यताज्ञानत्वे नैव साध्यविशेष्यकानुमितौ विरोधित्वमाह। साध्यप्रसिद्धिरेव वेति। एवकारात् अ
नुमित्साया उत्तेजकत्वस्यापि प्रतिक्षेपः सूचितः। साध्यताज्ञानमात्रस्य विरोधितायामनुभवमपि प्रमाणमाह। अ
तरां वेति। साध्यधर्मिकानुमितौ तज्ज्ञानमात्रस्य विरोधित्वादेवेत्यर्थः। इत्थं च धूमव्यापकाभावप्रतियोगिवह्न्य
भाववान् ह्रद इत्यादिव्यतिरेकपरामर्शजन्याया ह्रदे धूमाभाव इत्याद्यभाववसाध्यकानुमितौ वसाध्यविशेष्यक
त्वात् तत्रैव साध्यताज्ञानं विरोधीति मंतव्यं। वह्न्यादिभावसाध्यकस्थले तु विशेष्यविधया वह्न्यादिविधेयकानु

16

मितेरङ्गीकृतयातवसाध्यप्रसिद्धेर्विरोधित्वासंभवादिति ध्येयं।विशेष्यतास्वविधेयतावच्छेदकत्वसंबंधेनानुमि
तिसामान्यंप्रत्येवप्रकारतासंबंधेन ज्ञानमात्रस्यप्रतिबंधकत्ववाच्य।नचैवमपिगोत्वाभावोगोत्वव्यापकसा
ध्याशत्न्यइत्याकारकपरामर्शात्गोत्वाभावेगोत्वनेत्येवंपक्षनिष्ठप्रकारतानिरूपितसाध्यविधेयताकानुमि
तिर्नस्यात्परामर्शस्यैवसाध्यत्वानत्वेनैवविशेषित्वादिति वाच्यं इष्टत्वात्।गोत्वाभाववोनगोत्ववानित्येवंपक्ष
निष्ठविशेष्यतानिरूपितसाध्यविधेयकानुमितेरेवतत्रोत्पादात्साध्यतावच्छेदकधर्मानवच्छिन्नप्रकारता
निरूपितसाध्यविधेयकानुमितिस्तेनैववाप्रतिबध्यत्वंवाच्यमित्यपिकश्चित्।वस्तुतस्तुप्रसिद्धसाध्यकपरामर्शस्यविशे
ष्यविधयासाध्यविधेयकानुमितित्वावच्छिन्नंप्रत्येवहेतुत्वमन्यथागोत्वव्यापकाभाववत्तापरामर्शात्तदर्शोऽसिद्धास्त्के त्र
दितोयत्रगोत्वाभाववान्वयव्याप्यवत्तानिश्चयरूपस्तेन जनितायांविशेषणविधयागोत्वाभावविधेयकानुमितोव्य
भिचारापत्तेरप्रामाण्यज्ञानानास्कंदितस्यैवतद्व्यापकाभाववत्तापरामर्शस्यतदभावानुमितिहेतुत्वात्।तथा चोक्त
स्थले गोत्वाभावोनगोत्ववानित्यपि नानानुमितिः।विशेषणविधयागोत्वाभावविधेयकानुमितोगोत्वव्यापका शिव:
भाववत्त्वपरामर्शस्याहेतुत्वात्।तथाविधगोत्वाभावानुमितिहेतोर्गोत्वाभावव्याप्यवत्त्वप्रकारकपरामर्शस्य १६

विरहेणकारणबाधश्चेत्यन्यत्रविस्तरः। व्याप्तिस्मरणादिनेति। यत्रानुमित्सोत्तरं व्याप्तिस्मरणं ततः सिद्ध्यात्मकपरामर्शो
त्तरेत्यर्थः। तथैव तथा सत्येव। विशिष्टाभावस्येति। अनुमित्साविरहविशिष्टसिद्ध्यभावस्येत्यर्थः। मिश्रमतमाह। अन्येति
ति। अनुमित्सायामिति। सिद्धिदशायामिति शेषः। वाच्येति। सिषाधयिषाशब्देनानुमित्सायोग्यता वाच्या इत्यर्थः। सो
पत्तिरित्यादिरूपपदं तत्तदनुमित्सापरं तथा च तत्तदनुमित्सोत्पत्त्यनन्तरत्वविशिष्टस्तत्तदनुमित्साविषयसिद्धिप्रागभा
वो योग्यता इत्यर्थः। सिद्धिकालीनयदनुमित्साव्यक्तीयद्दशायाउत्तरकालमनुमितिर्भवितात दनुमित्साव्यक्तिविषयी
भूतसिद्धिप्रागभावस्य वर्तमानसिद्धं तरदशायामपि सत्वात् तदानीमनुमितेर्वारणाय विशिष्टान्तं। तत्तदनुमित्सोस
स नंतरत्वं च नत तदनुमित्सोत्पत्तिध्वंसविशिष्टत्वं तथा सत्यनुमित्सोत्पत्त्यनंतरक्षणेऽनुमित्यनुपपत्तेः। सि
षाधयिषोत्पत्तिक्षणे अनुमित्सोत्पत्तिध्वंसविशिष्टस्य तद्विषयसिद्धिप्रागभावस्यासत्वात्। किंतु तत्तदनुमित्सा
प्रागभावविरहविशिष्टत्वं वैशिष्ट्यं च प्राक्कालावच्छिन्नप्राक्कालवर्तित्वमिति नातिप्रसंगः। तत्तदनुमित्साप्राग
भावविरह २ विशिष्टत्वमात्रोक्तौ तवानुमित्सोत्तरमनुमित्युत्पादेऽपि पुनरनुमित्यापत्तिरतस्तदनुमित्साविषयसिद्धिप्रागभा
वपर्यंतानुसरणं। न च सिद्धिकालीनानुमित्सायाः स्वविषयीभूतप्राक्कानुमित्युत्पाददशायामपि दिनोत्तरभावि

त २

17

स्वविषयीभूतानुमितेः [illegible] तरप्रागभावसत्त्वादुत्तरकालमनुमित्युत्पत्तिरिति वाच्यं । तत्तदनुमितिप्रागभावविरह विरह
विशिष्टस्य तत्तदनुमितिविषयीभूतसिद्धिप्रागभावकूटस्याविवक्षितत्वादुक्तस्थले चोत्पन्नानुमितेरेव प्रागभावस्या
सत्त्वादिति भावः । इष्टि याद्दीनेति । अनुमानतः साध्यनिर्णयेतु स्वविषयसिद्ध्यनुत्पादएव तत्स्थे यादिति भावः । यद्य
२४ पि स्वपदेनानुमित्युपधायकतत्तदनुमितिसाध्यकीनानुप[illegible] हेतु संतरीयानुमितिसाध्यकेयोग्यतायामप्रवेशान्न
दोष इति । तथापि वस्त्वनुमितिसप्रकारकत्वेन गतीतानुमितिगोचरेच्छयासिद्धिकालेवस्त्वनुमितिर्नस्यात्तद्विषयानुमि
तिप्रागभावकूटस्य तदानीमसत्त्वात् तत्तदनुमितिपूर्वकालावृत्तित्वेन तत्तदनुमितिविषयसिद्धीनां तत्तदनुमि
तिकालीनत्वेन बा तत्तदनुमितिविषयसिद्धिप्रागभावानामविवक्षयाकथंचित्तदुपादाने [illegible] प्यनुमितिद्वयं जायते
ति तीच्छायामनुमितिद्वयं न स्यात् । तत्तदनुमितिविषयीभूतानुमितिप्रागभावकूटस्य प्रथमानुमित्युत्पत्तिदशा
यामसत्त्वात् तादृशेच्छायामपि मिश्रैरुक्तेजनकत्वोपगमादित्यादि दूषणं द्रष्टव्यं । उत्तमैतेबाधकं विनातेनानुमित्सो
त्तरं यत्रपरामर्शविरोधि तानापत्ता [illegible] कालोत्तरपरामर्शस्योत्पादस्तत्र सिद्धिदशायां नयोग्यता । अत शिवः
एव वक्ष्यति । फल बले नेति । तथा नेव कालइति सत्यनुपपद्यते । ननु यत्रानुमित्सोत्तरपरामर्शस्तत्र कालान्त

मुपादानेपिच त्रक्तिह्यात्मकपरामर्शोत्तरमनुमित्सातत्रानुमितिर्नस्यात्तत्र तत्कालानाम्युत्तेजकत्वाभावात् अत आह। अ
थवेति। उपलक्षितइति। तथाचानुमित्सानाशाधिकरणतत्कालोऽनुमित्साचद्वयमुत्तेजकमित्याशयः।तावतेति। सिद्धिनाशोत्तर
मपि यावत्कालसाध्यानुमितिर्नोत्पद्यतेतावान्तत्कालइत्यर्थः। ननुक्रियात्मकानांतावत्समयानामभावस्यसर्वदैवात्मनिसत्वा
त्तेनोक्तयोग्यताविवक्षयापि अनुमित्सानाशोत्तरमनुमितेःसंभवइत्यत आह। विशिष्येति। तथाचजन्यमात्रस्यकालोपाधितया
त्मसमवेतत्तज्ज्ञानादिकमेवतादृशसमयोवाच्यइत्यदोषः अवहितेरिति भावे क्तस्तेनावधानेरित्यर्थः। सकर्मकस्यावधा
पृ ६ तेःपंचत्यादेरिवकर्तरिक्तस्याव्युत्पन्नत्वादितिध्येयं।अनुमित्साव्यक्तीनामिवतन्नाशाधिकरणक्षणानामप्युत्तेजकत्वे ×द×ध
पापक्षतायोनिवेशगौरवंविनाऽनुमित्सामनुमित्युत्पादस्यसदिग्धत्वादित्यस्वरसमवदंतीत्यतेनस्तोचितः। उतानुन्नास्त्वेदृश्ये
इत्यादिद्वित्वादित्वलौकिकप्रत्यक्षान्यथानुपपत्त्याऽपेक्षाबुद्धीनामिवानुमित्सानाशोत्तरसिद्धिदशोत्पन्नतदनुमित्युपपत्त्याप्रागु
त्पन्नसिषाधयिषाव्यक्तीनामेवत्रिचतुःक्षणस्थायित्वंकल्पयितुमुचितं। विशेषगुणानांनाश्यनाशकताभावस्यविशेषत
एवविश्रामात् द्वितीयपक्षेस्तोविनाशसामग्र्यानावश्यकत्वादित्याहुः। साध्यनिर्णयेति। साध्यनिर्णयत्वप्रकारकेच्छानंतरमि
त्यर्थः। पूर्वोक्तन्यायेनानुमित्साप्रागुत्पन्नविशेषणज्ञानादिक्रमेणप्रत्यक्षमिति। तत्रतदनंतरमनुमितिप्रसंगइतिप

व्याप्य ३

18 रेणान्वयः तथाविधप्रत्यक्षस्य विशिष्टानुभवतयानुजनकज्ञानादिकल्पने गौरवादाह स्मरणं चेति। ननु यदिच्छासत्वे सिद्धिद
